श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकविंशत्यधिकशततमः सर्गः ॥

## श्रीरामस्यायोध्यायां गन्तुमुद्यमनं तदाज्ञया विभीषणेन पुष्पकस्यानयनं च

तां रात्रिमुषितं रामं सुखोदितमरिन्दमम्।
अब्रवीत् प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः॥ **6.121.1** ॥

स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च।
चन्दनानि च माल्यानि दिव्यानि विविधानि च॥ **6.121.2** ॥

अलङ्कारविदश्चैता नार्यः पद्मनिभेक्षणाः।
उपस्थितास्त्वां विधिवत् स्नापयिष्यन्ति राघव॥ **6.121.3** ॥

एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम्।
हरीन् सुग्रीवमुख्यांस्त्वं स्नानेनोपनिमन्त्रय॥ **6.121.4** ॥

स तु ताम्यति धर्मात्मा मम हेतोः सुखोचितः।
सुकुमारो महाबाहुर्भरतः सत्यसंश्रयः॥ **6.121.5** ॥

तं विना कैकयीपुत्रं भरतं धर्मचारिणम्।
न मे स्नानं बहु मतं वस्त्राण्याभरणानि च॥ **6.121.6** ॥

एतत् पश्य यथा क्षिप्रं प्रतिगच्छाम तां पुरीम्।
अयोध्यां गच्छतो ह्येष पन्थाः परमदुर्गमः॥ **6.121.7** ॥

एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः।
अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज॥ **6.121.8** ॥

पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभम्।
मम भ्रातुः कुबेरस्य रावणेन बलीयसा॥ **6.121.9** ॥

हृतं निर्जित्य सङ्ग्रामे कामगं दिव्यमुत्तमम्।
त्वदर्थं पालितं चेदं तिष्ठत्यतुलविक्रम॥ **6.121.10** ॥

तदिदं मेघसङ्काशं विमानमिह तिष्ठति।
येन यास्यसि यानेन त्वमयोध्यां गतज्वरः॥ **6.121.11** ॥

अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान्।
वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम्॥ **6.121.12** ॥

लक्ष्मणेन सह भ्रात्रा वैदेह्या भार्यया सह।
अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि॥ **6.121.13** ॥

प्रीतियुक्तस्य विहितां ससैन्यः ससुहृद्गणः।
सत्क्रियां राम मे तावद् गृहाण त्वं मयोद्यताम्॥ **6.121.14** ॥

प्रणयाद् बहुमानाच्च सौहार्देन च राघव।
प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते॥ **6.121.15** ॥

एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम्।
रक्षसां वानराणां च सर्वेषामेव शृण्वताम्॥ **6.121.16** ॥

पूजितोऽस्मि त्वया वीर साचिव्येन परेण च।
सर्वात्मना च चेष्टाभिः सौहार्देन परेण च॥ **6.121.17** ॥

न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर।
तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः॥ **6.121.18** ॥

मां निवर्तयितुं योऽसौ चित्रकूटमुपागतः।
शिरसा याचतो यस्य वचनं न कृतं मया॥ **6.121.19**॥

कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम्।
गुहं च सुहृदं चैव पौराञ्जानपदैः सह॥ **6.121.20**॥

अनुजानीहि मां सौम्य पूजितोऽस्मि विभीषण।
मन्युर्न खलु कर्तव्यः सखे त्वां चानुमानये॥ **6.121.21**॥

उपस्थापय मे शीघ्रं विमानं राक्षसेश्वर।
कृतकार्यस्य मे वासः कथं स्यादिह सम्मतः॥ **6.121.22**॥

एवमुक्तस्तु रामेण राक्षसेन्द्रो विभीषणः।
विमानं सूर्यसङ्काशमाजुहाव त्वरान्वितः॥ **6.121.23**॥

ततः काञ्चनचित्राङ्गं वैदूर्यमणिवेदिकम्।
कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम्॥ **6.121.24**॥

पाण्डुराभिः पताकाभिर्ध्वजैश्च समलङ्कृतम्।
शोभितं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितैः॥ **6.121.25**॥

प्रकीर्णं किङ्किणीजालैर्मुक्तामणिगवाक्षकम्।
घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम्॥ **6.121.26**॥

तं मेरुशिखराकारं निर्मितं विश्वकर्मणा।
बृहद्भिर्भूषितं हर्म्यैर्मुक्तारजतशोभितैः॥ **6.121.27**॥

तलैः स्फटिकचित्राङ्गैर्वैदूर्यैश्च वरासनैः।
महार्हास्तरणोपेतैरुपपन्नं महाधनैः॥ **6.121.28**॥

उपस्थितमनाधृष्यं तद् विमानं मनोजवम्।
निवेदयित्वा रामाय तस्थौ तत्र विभीषणः॥ **6.121.29**॥

तत् पुष्पकं कामगमं विमान -
मुपस्थितं भूधरसन्निकाशम्।
दृष्ट्वा तदा विस्मयमाजगाम
रामः ससौमित्रिरुदारसत्त्वः ॥ **6.121.30** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकविंशत्यधिकशततमः सर्गः ॥